*Siddhanta's International Journal of Advanced Research in Arts & Humanities*
*Vol. 3, No. 5, May-June 2026*

# वैदिकी वाक्

*Dr. Nirmla Devi, Ass. Prof. - Sanskrit, G.G.J. Govt College, Hisar, Haryana*
*Email: nirmiajnu31@gmail.com*

**भूमिका –**

*"वागेव विश्वा भुवनानि जज्ञे वाच इत्सर्वममृतं यच्च मर्त्यम्*

*अथेद्वाग् बुभुजे वागुवाच पुरुत्रा वाचो न पदं यच्च नाह।।*[1]

व्युत्पत्ति : वच् धातोः परिभाषणार्थे क्विप् प्रत्यये सति दीर्घऽसम्प्रसारणात वाक् शब्दोऽयं निष्पन्नः। 'वक्तीति वाक' उच्यतेऽसौऽनया वा, 'उच्यते यत् तद्वाक्यम्' इत्येवमादिरूपेण शब्दध्वनिभाषाप्रभृतयः शाब्दिकार्थाः स्वीक्रियन्ते।

निरुक्तेऽस्य शब्दस्य निर्वचनं – "वाक् वचेः" इति कृतम्। वैदिकनिघण्टुसंग्रहे[2] तु अस्य सप्तपंचाशत् शब्दाः पर्यायत्वेन प्रोक्ताः। यथा – ।श्लोकः। धारा ।इडा। गौ। ।गौरी। गाान्धर्वी। गम्भीरा.... सरस्वती।वाक्। अनुष्टुपः। धेनुः। सुपर्णी। वेकुरा[3] इत्येवमादयः। अतः वाचः विविधरूपाणि सन्ति। कुत्रचिद् जगद्नियन्त्री, कुत्रचिद् ब्रह्म, कुत्रचिदग्निः कुत्रचिद् प्रजापतिः, कुत्रचिद् समुद्रेत्येवमादिरूपेण चित्रिता। वाचैव सृष्टिः संजाता इत्यपि साङ्गोपाङ्गेन वर्णितम्।

वाण्याः प्रशंसायां छान्दोग्योपनिषदि उच्यते यत् तां बिना धर्माधर्मसत्यासत्यानां नियमनं न संभवति। यथोक्तं – यद् वै वाङ्नाम विषयन्न धर्मोनाधर्मो व्यज्ञिायिष्यन्न सत्यं नानृतं न साधु नासाधु न हृदयज्ञो ना हृदज्ञो वागेवै तत्सर्वं विज्ञापयन्ति, वाचमुपास्वेति। स यो वाचं ब्रह्मोत्युपास्ते यावद्वाचो गतं तत्रास्य यथा कामचारो भवति।[4]

**अन्यदपि –**

*"उतत्व पश्यन्न ददर्श वाचमुतत्वः श्रृण्वन्न श्रृणोत्येनाम्।*[5]

*उतो त्वस्मै तन्वं विसस्त्रे जायेव पत्ये उशती सुवासा।।"*

उतत्वः खल्वेकः पश्यन्नपि पश्यति, श्रृण्वन्नपि न श्रृणोति। अतः दर्शनश्रवणराहित्येन अन्धो वधिरश्चैवासौ वाचं प्रति। तद्यथा पत्ये कामयमाना जाया सुवासाः स्वात्मानं विवृणुते एवं वाग् वाग्विदे स्वात्मानं प्रकटयति। अत्र

---

1 शतपथ ब्राह्मण – 6/5/3/4
2 निरूक्तशास्त्र – द्वितीय अध्याय
3 वैदिक निघण्टु संग्रहः, पृ.सं.23
4 छान्दोग्योपनिषद्, 7/1–2
5 ऋग्वेदः ।
अमरकोषः – शब्दादि वर्ग–1

वाचः महिमैव गीयते। एवं प्रकारेण कथं तस्याः स्वरूपं वेदेषु वर्णितमिति विवक्षायां तत्स्वरूपं वर्णयितुं प्रयासः विधीयते।

**वाण्याः अभिव्यक्तिः**

वैदिकज्ञानयुक्तास्ति वाक्। यदा मानव–सृष्टिः संजाता तदानीन्तनकाले ते भाषातः अनभिज्ञाः आसन्। भाषायाः अभिव्यक्तिः देवपरिवारत एवाङ्गीक्रियते। ब्राह्मीति' शब्दः अमरकोषे वाचः पर्यायत्वेनोक्तम्। आदौ ब्रह्मणा वाणी स्वात्मजमङ्गिरां ततः स्वपौत्रं बृहस्पतिं तदनन्तरं बृहस्पतिना ऋषिभ्यः ज्ञानं प्रदाय वेदवाणी प्रदत्ता। बृहस्पतिः ऋषीणां हृदये वाचं प्रेरितवान्। ऋषयः वाचं प्राप्य स्वपरितस्थानि वस्तुनि दृष्ट्वा तेषां नामकरणं भवेदिति मनसा इष्टवन्तः। अनयैव नामरूपात्मकजगतः अभिव्यक्तिः जाता। अङ्गिरा इन्द्राय वाचं शिक्षितवान्। उक्तं च –

*"इमाधियं सप्तशीर्ष्णीं पिता न ऋतप्रजातां बृहतीमविन्दत्।*[6]

*तुरीयं स्विज्जनपद् विश्वजन्योऽयास्य उक्थमिन्द्राय शंसना।।"*

परमकारूणिक भगवता प्रेरितायाः वाचः कारणादेत ऋषयः दोषरहितां वाणीमुक्तवन्तः। उक्तांच मन्त्रे –

*"बृहस्पतेः प्रथमं वाचो अग्रं यत्प्रैरत नामधेयं दधानाः*[7]

*यदेषां श्रेष्ठं यदरिप्रमासीत् प्रेणा तदेषां निहितं गुहाविः।।*

बृहस्पतिना या वाक् प्रेरिता सा शुद्धा दैवी चासीत्। ऋषिभिरपि तस्यां न किंचिंदपि मिश्रितम्। अतः तस्या स्तुतावेव मन्त्रोऽयं यत् –

*"सक्तुमिव तितउना पुनन्तो धीरा मनसा वाचमक्रत।*[8]

*अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि।"*

यथा चालन्या तुषाद्यपनयेन सक्तवो शोध्यन्ते तद्वत् दुरीकृतापशब्दां शुद्धां कुर्वन्तः धीराःमनसा तामपभ्रंशरहितां कृतवन्तः। वागधिष्ठातुः ये सख्यभक्तिं प्राप्तवन्तः तेषामधिवाचि या वेदादौ वर्णिता निश्रेयसकरी लक्ष्मीस्वरूपा वाग् परमाद्संविद्रूपा स्थिता सा अस्मद्वाचि स्यादिति वाचः स्तुतावेव अभिधीयते।

परम्परया ऋषिभिर्या वाग्ज्ञाता तथैव अद्यत्वेऽपि गुरूभिः सहोपविश्य छात्राः ज्ञानमाप्नुवन्ति। अतः परम्परेयं पुरातनी विशाला च वर्तते। इयं वाक्[9] सप्तछन्देषु विभज्यते। ते सप्त गायत्री–उष्णिक्–बृहती–विराट् त्रिष्टुभादयः सन्तिः। तयैव काव्यसंगीतादीनां रचना संभवति। यथोच्यते –

*"यज्ञेन वाचः पदवीयमायन्तामन्व विन्दन्नृषिषु प्रविष्टाम्।*[10]

---

6 ऋग्वेद – 10/67/1

7 ऋग्वेद – 10/71/10

8 ऋग्वेद – 10/71/2

9 ऋग्वेद – 10/130/4–6

10 ऋग्वेद – 10/71/3

*तामाभृत्या व्यदधुःपुरूत्रा तां सप्त रेभा अभि सं नवन्ते।।*

श्रुतौ उच्यते यदियं वाग्रूपी परमात्मा निराकारः सर्वशक्तिसम्पन्नः नित्यः च वर्तते यः सर्वेषु अन्तर्यामिरूपेण वर्तमानोऽस्ति। अतः वाङ्नित्या यथोक्तं वेदे –

*"वाचा विरूप नित्यया।" (ऋग्वेद – 9/75/6)*

सृष्टेः सकलपदार्थाः जनकल्याणायैव रचिताः सैव नामरूपपदप्रभृतीन् विकरोति। व्याकरणं वाचः वैशिष्टयं खलु। तद्रुपं वाचः विकारमात्रम्। कथितं यत् –

*"देवस्य पश्य काव्यं महित्वाऽद्या ममार स हयः समानः।"*[11]

अथर्ववेदेऽपि कथ्यते –

*"देवस्य पश्य काव्यं न ममार न जीर्यति।*[12]

वाचः प्रथमाभिव्यक्तिः वेद एव वर्तते। वेदमन्त्राणां लेखान् मिश्रस्थजनाः पवित्रलेखाः इत्येवं रूपेणावगच्छन्ति स्म। "देवो के शब्दों का लेख" इति नाम्ना प्रसिद्धान् लेखान् "प्रसिद्ध लेखो के घर" इत्यभिधेयेन प्रसिद्धगृहेषु स्थापयान्ति स्म। ते वेदानां वाचे 'देवमन्द्रा' इति शब्दं प्रयुंजन्ति स्म। ओमथव्याहृतिमन्त्राः हिरण्यगर्भप्रभृतिभिः तन्मात्रारूप–वागिन्द्रयेण पूर्वमेवोच्चारिताः। उक्तं च –

*"देवीवाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति।*

*सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुप सुष्टुतैतु।।"* [13]

मनुष्याणां वाक् व्यक्तरूपे पशूनां वाक् अव्यक्तरूपे च वर्तते।

**वाचः विभिन्नरूपाणि :**

**(i) परमशक्तिस्वरूपे :**

ऋग्वेदस्य पंचविंशत्यधिक एकशततमे सूक्ते वाचः सर्वव्यवहारणत्वमङ्गीक्रियते। सूक्तेऽस्मिन् वाक् अम्भृणर्षे आत्मजा वर्तते। सा स्वगुणान् प्रौढोक्त्या वर्णयति। वाक् ब्रह्मणा सह तादात्म्यंमनुभवन्ती रूद्रप्रभृतिभिः सह विचरति। सैव मित्रवरूणेन्द्राग्निं विभर्ति। अनेन ज्ञायते यत् सा ब्राह्मणः स्वरूपं जानातीति प्रतीयते यथोक्तम् –

*"अहं रूद्रेभिर्वसुभिश्चराम्यहमादित्यैरूप विश्वदेवैः।*

*अहं मित्रावरूण शोभा विभ्रम्यहमिन्द्राग्नी अहमश्विनोभा।।"*

एवमेव प्रजापतिर्वै वागित्यपि उक्तम्। तयैव राष्ट्रशक्तेः नियमनं विधीयते। सा सोमतत्त्वेन सह त्वष्टापूषनभग–भगतत्वानामपि पोषयित्री। जनैः तया साहाय्येन समृद्धिः प्राप्यते। अतः देवमनुष्यैः सा पूजार्हा।

---

11 ऋग्वेद – 10/55/5

12 अथर्ववेद – 10/8/23

13 ऋग्वेद – 8/100/11

सा यज्ञियानामग्रणी, संगमनी, राष्ट्री भुवनानाम् अन्तर्यामिरूपेण सर्वत्रैव विराजते। यथोक्तं – अहं सोममाहनसंविभर्म्यहं... ।[14]

सूक्ते वाचा प्रौढोक्त्या उच्यते यत् अहं स्वयंमिदं वस्तुब्रह्ममात्मकं जगत् वदामि उपदिशामि च। सृष्टिनिर्माणसामर्थ्यं ब्रह्मणे मयैव दीयते। अप्रत्यक्षस्य चालौकिकस्य ज्ञानस्य सैवोत्पादयित्री। यथेच्छया मूर्खं विद्वासं च निर्मातुमर्हा।

**अभिहितमपि –**

*"अहमेव स्वयंमिदं वदामि जुष्टं देवेभिरूत मानुषेभिः*

*यं कामये तं तमुग्र कृणोमि तं ब्रह्मणं तमृषिं तं सुमेधाम्।।*[15]

वाग्देवी देवान् प्रेरयित्वा शत्रून् संहारयति। द्यावापृथिंव्यौ सैव आविवेशा। सा स्वकारणशरीररं स्पृशन्ती। भुवनभूतस्मदासु सवत्रैव व्याप्ता। ब्रह्मणः शिरस्थं द्युलोकमन्तरिक्षं च वागेवोत्पादयति –

*"अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्ववन्तः समुद्रे*[16]*,*

*ततो विवष्ठे भुवनानु विश्वोतामूं द्यां वर्ष्मणोपस्पृशमि।"*

इयं वाग्देवी दैनिकव्यवहारानपि सम्पादयति। स्वमन्यमानान् शूत्रनपि सैव हन्ति। यथा –

*''मया यो अन्नमत्ति यो विपश्चति, य प्राणिति य ईं शृणोत्युक्तम्।*

*अमन्तवो मां व उपक्षियन्ति श्रुधि श्रुत श्रद्धिवं ते वदामि।।''*[17]

सूक्तेन स्पष्टं ज्ञायते यत् दैवी अतीवसूक्ष्मरूपा जगद्रुपे विभक्ता, देवादिभिः पूज्या, शत्रुविघातिनी, सृष्टेः कारणमित्येवमादिरूपेण वर्तमानास्ति। अतः वाक् परमशक्तित्वेन परमाद्संविद्रूपाश्चास्ति।

**अग्निरूपिणी –**

वाक् सूक्ते यदुक्तं योऽन्नमत्ति इति मन्त्रे संशयो जायते यत् वाचा वदनं तु संभवति कथं खादनामिति? एवमेव जैमिनीय–ब्राह्मणेऽपि उक्तम –

*"द्वयं वाचा करोति अन्नं चैनयाति वदति च।"*[18]

---

14 ऋग्वेद – 10/125/3

15 ऋग्वेद – 10/125/5

16 ऋग्वेद – 10/125/7

17 ऋग्वेद – 10/125/4

18 जैमिनीय ब्रा. – 9/254

अस्य प्रश्नस्य समाधानमपि अत्रैव यतोहि कारणरूपा या शक्तिः तया किं न संभवति। ब्राह्मणग्रन्थेष्वस्य अन्यद् समाधानं प्राप्यते। यथा "अग्निवै वाक्", ''वागेवाग्निः"[19] "या वाक् सोऽग्निः[20]" इत्यत्र अग्निर्वाचोः तादात्म्यं दृश्यते। वैश्वानर इति शब्दः अग्नेः पर्यायत्वेनोक्तः।

"अग्निर्वैश्वानरो वह्निवीतिहोत्रो धनंजयः सैव वैश्वानरः भोजनं पाचयति। उक्तंच शतपथब्राह्मणे।

*"अयमग्निर्वैश्वानरो योऽयमन्तः पुरुषे येनदमन्नं पच्यते यदिदमत्यते।"[21]*

अग्निनैव अन्नं पच्यते इति स्पष्टम्। अग्निरेव मुखे वाग्भूत्वा प्रविष्टेति ऐतरेयब्राह्मणे प्रोक्तम्। "अग्निर्वाग्भूत्वा मुखं प्राविशत"[22] 'अग्निर्वाचि' (हुवः) (शा.आ. 10.1) वाचमिग्निरपि कथिता।

*"अग्नितत्वं हि वाग्वेदे मुख्य तत्वं प्रकीर्तितम्,*

*लोके चाग्निर्हि वाग्भूत्वा सर्वेषां मुखमाविशत्।*[23]

काठकसंहितायां वाग्पृथिवी–अग्निप्रभृतीनां परस्परं सम्बन्धो वर्णयते। "या (वाक्) पृथिव्यां साऽग्नौ सा रथन्तरे।[24]"

पृथिव्याः सम्बन्धः गायत्र्या सह वर्तते। "अग्निगायत्री छन्दा" तथैवाग्निरपि शरीरत्वेन तैतिरीयसंहितयोक्तम्। तर्हि प्रश्नोऽयं कथं वसति वैश्वानराग्निः शरीर इति? तदोच्यते – यदा अस्माभिः अङ्गुल्यौ कर्णद्वयानां पिधानं क्रियते तदा अस्मद्–शरीरात् यः ध्वनिः श्रूयते स एव वैश्वानरः।

जड़चेतनादयः ये सांसारिकपदार्थाः तेषां सत्ता वैश्वानराग्नेः कारणादेव वर्तते। जड़पदार्थेष्वपि 'आदानविसर्ग' नाम्नी क्रिया भवति। एतस्माद् कारणादेव तेषु कूटस्थता नायाति। यतोहि जगति कोऽपि कूटस्थः पदार्थः दृष्टिपथे नायाति। वैदिकभाषायां मरणममृतत्त्वार्थे आयाति। उक्तं च – योग्निर्मृत्युः सोऽग्निर्वागेव।[25]"

प्रत्येकस्मिन् पदार्थे केचन परमाणवः आगत्य अङ्गभूताः भवन्ति। इयं पाचनक्रिया, परंच यदा ते पृथकीकरणमाप्नुवन्ति तदा व्यक्तेः मृत्यु भवति। अयमग्निहोत्रप्रक्रिया सर्वेषु प्रचलति। अतः वाक् अग्निहोत्रीत्यापि कथ्यते। – "वाग् वा अग्निहोत्री" (जै.ब्रा.) सैव परितः शक्तिमाह्वयति। 'अग्निर्वैहोता अधिदैवम् वाग् अध्यात्मम्'[26] अग्निरेव अध्यात्मे वाग्नाम्नाभिधीयते। एवं प्रकारेण अग्निरूपे वागेव वर्तते। सैव अध्यात्मे वाक् इति कथ्यते। विवेचनेन ज्ञायते यत् अत्रापि वाक् सूक्ष्मरूपे सर्वत्रव्याप्तास्ति। सैव सर्वेषां व्यवहाराणामाधारः।

---

19 श.ब्रा. – 3/2/2/13
20 श.ब्रा. – 14/58
21 ऐ.ब्रा. – 2/4/2
22 काठक सं – 14/5
23 वेदविज्ञानामृतम् – 29
24 काठक सं – 14/5
25 जै.ब्रा. – 3/249
26 श.ब्रा. – 1/19

**आत्मनःघटकरूपे –**

*शतपथब्राह्मणानुसारं मनप्राणादयः आत्मनः घटकत्रयम्।*

आत्मनःघटक :

1. मनस्
2. प्राणः
3. वाक्

एतेषां त्रिक् ऋग्यजुसामत्रयोवत् वर्तते। क्रमशः सूक्ष्मात् स्थूलतरं प्रति एतेषां स्थितिः। त्रयाणामेव परस्परं घनिष्ठः सम्बन्धः। यजुर्वेद उक्तं यत् – ऋचं वाचं प्रपद्ये[27] मनो यजुः साम प्राणं प्रपद्ये।"

| | | | | |
|---|---|---|---|---|
| ऋक् | वाक् | अग्नि | भूः | – ''वागेवाग्निः''[28] "वागेवर्ग्वेदः' जैमि. उप. 14/4/3/12) |
| यजुः | प्राणः | वायुः | भुव | – अयं वै प्राणे योऽयं पवते (श.ब्रा. 5/2/4/10) |
| सामः | मनस् | सविता | स्वः | – मन एव सविता (गो. ब्रा. 1/1/13) |


एतेषां सर्वेषामेव परस्परं घनिष्ठसम्बन्धो वाग्प्राणप्रभृतिभिः सहैव वर्तते। मन न सीमितं परंच वाक् तदपेक्षया सीमिता। यथोच्यते – 'अपरिमिततरमिव[29] हि मनः परिमिततरेव हि वाक्।।'' सूक्ष्मः स्थूलादेव जायते प्रायशः। ''मनसो हि वाक् प्रजायते''[30] एतयोः सम्बन्धेनैव जैमिनीय ब्राह्मणे उच्यते ''वागिति मनः''। तथैव वाग्प्राणयोः तादृश एव घनिष्ठः सम्बन्धः। प्राणमपि वागित्यपि उक्तम्। यथा – ''प्राणो वै वाक्''[31], ''प्राणे वाचस्पतिः''[32] प्राणेनैव वाग्विस्तार्यते। स्पष्टमेतद् यत् एतेषां त्रयाणां सम्बन्धः सुसम्बद्धं वर्तते। – त्रयाणां मिथुनविषयेऽपि उक्तम्। ''तद्वै दैव्यं मिथुनं यद् वाक् च प्राणश्च।'' (जै.ब्रा. 1/306) अन्योदाहरणान्यपि प्राप्यन्ते। ऐतरेयारण्यके ''वाग्वै माता प्राणः पुत्रः'' इति कथितम्।

वाक् गौ सदृशी प्राणः तस्थ्य गर्भ इत्यत्र 'वागस्य जन्मना वशा सा प्राणः गर्भमधत्त।[33] एवमेव गौर्वे वागित्यपि विविक्तम्। वाग्प्राणादीनां क्रमविषयेऽपि आरण्यकग्रन्थेषूच्यते। उक्तं च ''वाक् पूर्वरूपं मन उत्तरं रूपं प्राणः संहिता।'' मनो वै पूर्वम् अथ वाग्र[34] (जै.ब्रा. – 1/128/)

---

27 यजुर्वेद – 36/1
28 श.ब्रा. – 3/2/2/13
29 श.ब्रा. – 1/4/4/7
30 जै.ब्रा. – 1/320
31 मैत्रीयणी संहिता – 3/2/8
32 श.ब्रा. – 6/31/8
33 तै. संहिता – 1/13/15
34 ऐत आरण्यक – 3/1/1

चित्रे तेषां क्रमः दुष्टुं शक्यते नामरूपात्मकसृष्टौ एवेषां किं योगदानमिति पृष्ठे सति शतपथब्राह्मणे विविक्तं ''मनसा हि वेदेदं रूपमिति, वाचा हि नाम गृहणाति।'[35]




वाग्वै मनसो ह्रसीयसी'' वाग् वै समुद्रो मनः समुद्रस्य चक्षुः[36]

अतः त्रयाणां विवेचनेन ज्ञायते त्रयाणामेव परस्परं तादात्म्यं सहयोगं च वर्तते। यथा गौ। वत्समनुसरति तथैव मन वाचमन्वेति। ''तस्यै मनन एव तत्सः। मनसा वै वाचं पृक्तां दुहे तत्सेन वै मातरं पृक्तां दुहे। तद्वा इदं मनः पूर्वम्। यत् पश्चा वागन्वेति तस्मात् तत्सं पूर्वं यन्तं पश्चा मातान्वेति जै.ब्रा. (1/19)। एतेषामवलोकनेन ज्ञायते ब्राह्मणग्रन्थेषु यत् मनसा इष्यते, प्राणेन तप्यते, वाचा श्रमः विधीयते। (श.ब्रा. 14/4/3/10) सोऽकामयत्। स तपोऽतप्यत्। सोऽश्राम्यत्। अतः निष्कर्षेण ज्ञायते यत् सृष्टिनिर्माणे वाक् सहायकी।

**प्रजापतिरूपे** – प्रजापतिरेव वागिति। द्विविधा वाक् प्रोक्ता व्यक्ताव्यक्ता च। वाचा सर्वव्याप्यते। ''वाक् वै विराट्।''[37] यथा वेदान्ते माया ब्राह्मणः शक्तिः तथैव वाग् प्रजापतिनः महिमा। सृष्टिनिर्माणकाले वाचैव गर्भः धारयते।

यथोक्तं – "वाग्वा अस्य प्रजापतिः स्वो महिमा।[38] रचनायां द्वैतमावश्यकम्। प्रजापतिः वाग्माता इत्यप्यङ्गीक्रियते। यथोक्तं ताण्डयेब्राह्मणे – ''प्रजापतिर्वा इदमग्र आसीत्। तस्य वाग्[39] द्वितीया आसीत् त्वं मिथुनं समभवत्। सा गर्भमधत्त।'' उच्यते यत् प्रजापतिः सर्गं निर्माय तामेव प्रविष्टः। संसारे यत्किमपि प्रजापतिरेव वर्तते यथा – ''यद्वै किंच प्राणि स प्रजापतिः।'' ''तत्सृष्ट्वा तदेवानुप्राविशत्।''[40] एतादृशाः भावाः वाक्सूक्तेऽपि वर्तन्ते। यथा – ''अहमेव वात इव प्रवामि''[41] – इत्यस्मिनुदाहरणेऽपि वाक् सर्गं निर्माय वायुवत

35 शतपथ ब्राह्मण – 11/2/3/3/5
36 ताण्डय ब्राह्मण – 3/4/7
37 शतपथ ब्राह्मण – 3/5/1/34
38 शतपथ ब्राह्मण – 2/2/4/4
39 काठक सं. 12/5
40 ताण्डव ब्रा. – 20/14/2
41 तै. ब्राह्मण – 1/8/8/1

तस्मिन्नैव प्रविशति। यदा प्रजापतिना भूर्भुव इति नामनि उच्चरितानि तदा पृथिव्यन्तरिक्षाभ्यां निर्माणं स्वयंमेवाभवत्। यथा तैत्तिरीयब्राह्मणे विविच्यते – ''स भूरिति व्याहरत। स भुवम असृजत। स भुवरिति व्याहरत। सोऽन्तरिक्षम् असृजत।''[42]

एवमेव वायु अपि प्रजापति–नाम्नाभिधीयते। ''वाग्वायोः पत्नी'' (मैत्रायणी संहिता – 1/9/2)। वाग्वै वायु[43] स. पंचविधः प्राणोऽपानोदानसमानादयः। अत वाग् मुख्यतत्वं सैव मनस् प्राणेऽपि कथ्यते। अत्रापि तस्याः स्वरूपं प्रजापतिसदृशं वर्तते। ''प्रजापतिवै वाक्''[44] इत्यपि स्वीकर्तुं शक्यते।

**वाचः विश्वषाव्यापकता –**

पंचपर्वेयं सृष्टिः प्रतिपर्वस्य मनप्राणवागिति मनोतात्रयम्। स्वयम्भूपरमेष्ठीत्येवमादयः पंचपर्वा। तेजु स्वयंम्भोः मनोतारः वेदसूत्रप्रभृतयः ते क्रमशः वाग्प्राणमनांसि एव सन्ति। एवमेव अन्येषामपि विभाजनं तालिकायां स्पष्टतया द्रष्टुं शक्यते।

| मनस् प्राणः वाक् | वाक् | प्राणः | मनस् |
|---|---|---|---|
| विश्व | | | |
| स्वयम्भू | इळा (वेद) | सूत्र | नियति |
| परमेष्ठी | ज्योतिः | ऊर्क् | भोग |
| सूर्यः | योनिः | गौ | आयु |
| चन्द्रमा | रेतस् | यशस् | श्रद्धा |
| पृथिवी | वाक् | प्राण | गौ |

परमोष्ठ्याः मनोतारः ज्योत्यूर्क् भोगश्चरित्त। सूर्यस्ययोनिगौ–आयुश्च सन्ति। ते च क्रमशः वाग्प्राणमनसश्च सन्ति। अतः वाग्प्राणमनसां वैशद्यं सर्वत्रैव दृश्यते।

पर्वानुगुणमेव वाचः नामानि स्वयम्भवी, परमेष्ठी, मनोता, परमेष्ठिनीत्येवमादयः सन्ति। पर्वेषु विद्यमाना वाग्नित्या वर्तते यथोक्तं – ''अनादिनिधना नित्या वागुत्सृष्टा स्वंयम्भुवा।' वाचः कृते विविधनामानि सन्ति। परमेष्ठिनी[45] इत्यभिधेया वाक् अथर्ववेदे, शतपथ ब्राह्मणे – ''महिषी हि वाक्''[46], ऋग्वेदे – ''अहमेव राष्ट्री भुवनानां जज्ञे[47]. ..'', ''वाग् वै राष्ट्री'' (ऐतरेय ब्राह्मण – 9/6)

42 मैत्रा. सं. 1/9/2
43 ऐतरेय आरण्यक – 2/3/
44 तैत्तिरीय ब्राह्मण – 1/3/4/5
45 अथर्ववेद – 16/8/3
46 ऋग्वेद – 10/125
47 शतपथ ब्रा. – 6/5/3/4

द्वितीयपर्वपर्यन्तं वाक् स्वरव्यंजनयोः रूपे न विभक्ता निरूक्ता च। अतः ''एकाक्षरा वै वाक्[48] ''जैमिनीयब्राह्मणे अभिधीयते। सैव वाक् सौरदेवै सौरी रूपेण विपरिणमिता। ''युंजामि वाचं सह सूर्येण[49] (ताण्डय ब्राह्मणे – 1/2/1) वाचः नामानिः –

(i) स्वंयम्भू – ब्रह्म (अग्निः) ''वाग् वै ब्रह्म

(ii) परमेष्ठी – महिषी, राष्ट्री, साम्राज्ञी, एकाक्षरा। (एकाक्षरा वै वाक्)

(iii) सूर्य – सौरी, ब्रह्म

(iv) चन्द्रमा – सोम, सुब्रह्मण्या – वाग् वै सुब्रह्मण्या – ऐ.ब्रा. 6/3

(v) पृथिवी – ब्रह्म, अनुष्टुपः ''वाग्वैब्रह्म'' ''वाग्वा अनुष्टुपः'' (मैत्रायणी संहिता – 2/3/7)

अग्निप्रधानपर्वेषु वाचे ब्रह्मेत्यभिधेयः परंच सोमप्रधानपर्वेभ्यः ब्रह्मेति नाम दीयते। ''वाग् वै ब्रह्म[50] सुब्रह्म चेति। पंचवाचां सङ्केत ऋग्वेदेऽपि प्राप्यते। ''त्रयस्वपन्ति पृथिवीमनूपा द्वा बृबूकं वहतः पुरीषम्।''[51]

**ब्रह्मस्वरूपे –**

वाणी सर्वज्ञातारूपे प्रोक्ता ऋग्वेदे। सैव ब्रह्मत्तत्वरूपेऽभिधत्ता। ऋग्वेदे उक्तं – ''पृच्छामि[52] वाचः परमं व्योम।'' ब्रह्मयं वाचः परमं व्योम। वाचः एतादृशःस्वरूपं वाक् – सूक्तेऽपि दृष्टिपथमवतरति। सर्गोत्पवौ ब्रह्मैव कारणं तदवत् वाग्विषये सायणेभाष्यकारेणोक्तम् यथा'' सर्वजगदात्मनाहं संभूतास्मि।''[53]

एवमेव अन्यदपि 'वाग्वै ब्रह्म[54] इत्युच्यते। ''वागाम्भृणी[55] यद् ब्रह्म जगत् कारणं – ...मयि हि सर्वं जगच्छुक्तौरजमिताध्यास्वे संदृश्यन्ते।'' उपनिषत्सु अपि ''वाग्वै सम्राट्[56] परमं ब्रह्म। अन्यदपि –

*''तदेतदक्षरं ब्रह्म प्राणस्तदुवाङ्मनः।*

*तदेतत् सत्यं तदमृतं तद्वेधव्यं सोम्य विद्धि।। (मुण्डको.)*

केनोपनिषदपि अयमेव भावः स्पष्टो भवति। यथा – ''यद्वाचानभ्युदित....''।

बृहस्पतिरूपेऽपि वाग्प्रोक्ता –

---

48 जैमिनीय ब्राह्मण – 2/392
49 ताण्डय ब्राह्मण – 1/2/1
50 ऐतरेय ब्राह्मण – 6/3
51 ऋग्वेद – 10/27/23
52 ऋग्वेद – 1/164/34–35
53 ऋग्वेद – 10/125/8 (सायण भाष्य)
54 ऐतरेय ब्रा. 6/3
55 श.ब्रा. – 4/6/7/5
56 बृहद. उप. – 4/1

*''सदस्मै वाचो बृहत्यै पतिस्तस्मात् बृहस्पतिः।'*[57]

एवमेव अन्यदपि –

*"वाग् वै बृहती तस्या एष पतिस्तस्माद् बृहस्पतिः*[58] *।*

*वाग् वै ब्रह्म तस्या एष पतिस्तस्माद् ब्राह्मणस्पतिः।''*

अनेन मन्त्रेण ज्ञायते यत् बृहस्पतिः वाण्यां पारङ्गतः आसीत।

**सरस्वती** – सामान्यदैनिकव्यवहारेऽपि अस्माभिः वाग्देवी सरस्वत्येव मन्यते। तथैव वेदेष्वारी सरस्वतीस्वरूपा वागभिधीयते। 'वाग् वै सरस्वती'[59], 'वाग्वै शबली'[60] कामधेनु इति सायणः। गौर्वे वाक् (मैत्रा. सं. – 9/2/1) ''वाक् तु सरस्वती' – (ऐ. ब्रा. 3/1), (तै. ब्रा. 6/7)

**अन्यदपि** – ''सारस्वत्यातमया प्रचरति। वाग्वै सरस्वती। तस्माद्प्राणानां वागुत्तमा। अथो प्रजापतोवेव यज्ञं प्रतिष्ठापयति। प्रजापतिर्हि वाक् इति। अपन्नदती भवति। तस्मान्मनुष्याः सर्वाः वाचं वदन्ति।''[61] अतः अत्रापि प्रजापतिसरस्वतीरूपे वागभिहिता।

**सुपर्णी वाक्** – शतपथब्राह्मणे सुपर्णी इति नाम्नापि वागाभिधीयते। 'शोभनपर्णयुक्ता सा सुपर्णी'। वाचि आकुंचनं प्रसारणं भवति यतो हि तां क्रियां बिना पिण्डस्य सत्ता न संभवति। वाचाहीदं सर्वकृतम्। ''वागेव सुपर्णी।''[62] वाचः आकुंचनप्रसारणनामनि पक्षद्वयम्। ''प्राणे वै समंजनप्रसारणं (श.ब्रा. – 7/1/4/10)

विद्युतेतिनाम्नापि वाग् कथिता[63]।'' यद् विद्योतते यद् विद्यूतुते ततस्तनयति यन्मेहति तत् वर्षति वागेवास्य वाक्।'' एवमेव –

''स्तनयित्नुस्तेवाक् प्रजापते वृषाशुष्मं क्षिपसि भूम्यां दिवि, तां पश्व उपजीवन्ति सर्वे तेनो सेष मूर्ज पिपर्ति।।[64]

भावोऽयं यत् वाचैव पशूनां कृते जीवनं दीयते। विद्युतैव वाग्रूपे (वाग्रुपे) द्युलोके पृथिवीलोके च शक्त्याधानं करोति।

**समुद्ररूपे** – यजुर्वेदे वाचः साम्यं समुद्रेण सह विधीयते। समुद्रवत् सापि अगाधदुर्बोधा, अजन्मा, अनन्ता, सर्वव्यापी च वर्तते। सैव सदस् ऋत्–द्वारमपि मन्यते। उक्तं च 'समुद्रोऽसि विश्व व्यचाऽजोऽस्येक पाद हिरसि बुद्धन्या वागस्यैन्द्र मसि सदोऽस्यृतस्य द्वारौ।[65]

---

57 जैमि. उप. – 2/2/5

58 बृह. उप. – 1/3 का 20 – 21

59 तैत्ति. ब्र. – 6/7

60 ता. ब्रा. 21/31

61 कृष्णयजु. तैत्ति. ब्रा. – 1/3/2/5

62 शत. ब्रा. – 3/6/2/2

63 बृहदारण्यक उप. – 1/1

64 अथर्ववेद – 9/1/20

65 यजु. – 5/33

**अन्यदपि –** ''वाग् वै समुद्रो न वै वाक् क्षीयते न समुद्रः क्षीयते।''[66] ताण्डयब्राह्मणे – वाक् वै समुद्रः मनः समुद्रस्य[67] चक्षुः। वागेव जगतः स्त्रष्टा। यथोक्तं – 'वाग्वै विश्वकर्माऽर्षि[68]'' वाक्छुद्रुपे शक्तिस्वरूपा ता शक्तिमापः शरीरंच कथ्यते। तदनन्तरं सरिरमेव सलिले परिवर्तितः। एतस्माद् सपर्णकारणाद् सर्पराज्ञी कथ्यते यथा ''वाग् वै सर्पराज्ञी[69]'' इति।

**साहस्त्री –** ऋग्वेदे त्रिसहस्त्रसंख्यका वाक् प्रोक्ता। ''त्रेधा सहस्त्रमवितदेरयेथाम्'' (ऋ. 6/69/8)। निदानविद्यायां वाक् साहस्त्री अभिहिता। ''वाग् वा एषा[70] निदानेन साहस्त्री।'' अग्रिममन्त्रे वाक् ब्रह्मसादृश्यं प्राप्नोति यतो हि जड़पदार्थेष्वपि विद्यते। यथोक्तम् ऋग्वेदे –

*''सहस्त्रधापंचदशान्युक्था यावद्धावा पृथिवीतावदित्तत्।*

*सहस्त्रधा महिमानः सहस्त्रं यावत् ब्रह्म विष्ठितं तावती वाक्।।''*[71]

ऐतरेय ब्राह्मणा सहस्त्रस्य व्याख्या क्रियते किं तत्? सहस्त्रमिति लोकवेदवागिति त्रिसहस्त्रत्वेनोच्यन्ते। 'तदाहुः कि तत् सहस्त्रमितीमे लोका इमे वेदा अथो वागिति।[72]

**ऐन्द्री –** भौतिकी वागिन्द्रस्य पत्नी। इन्द्रो हि प्रथमो वैयाकरणः। यज्ञरूपिणी वाक् व्याकृता भवति। अत्र दैवी वाक् क–च–ट–त प्रभृतिषु विपरिणति। ''वाग् वै यज्ञः''[73]

यज्ञविषये ऐतरेयारण्यके अभिहितं यत् – मनसः वाग्भवनं तस्या पुनः मनसि विपरिणम्नमेव यज्ञः। यथा –

*''वाचश्चित्तस्योत्तरोत्तरिक्रमा यद्यज्ञः'' (ऐ. – 2/3/3/15)*

वाग्साहाय्येनैव मनुष्यपशवादयः जीवनं संधारयन्ति।

*''वाचं देवा उपजीवन्ति विश्वे वाचं गन्धर्वाः पशवो मनुष्याः।*[74]

*वाचीमा विश्वाभुवनान्यर्पिता सा नो हवं जुषतामिन्द्रपत्नी।।''*

एवं प्रकारेण वाचः रूपाणां विज्ञाने सति ज्ञायते वाक् परमशक्तिः वर्तते।

**वाग्भेदाः** – वाग्विषये 'उतत्व पश्यन्न – ''प्रभृतयः मन्त्राप्रोक्ताः। मुख्यत्वेन वाक् चतुर्धा विभज्यते। ऋग्वेदस्य सूर्यसूक्ते देवानामनीक–वाचमेव स्वीक्रियते। यतोहि तयैव असुराः परास्ताः। उक्तं च –

---

66 ऐत. ब्रा. – 5/16
67 ता. ब्रा. – 6/4/7
68 यजु. – 13/58
69 श.ब्रा. – 4/5/8/4
70 कौषीतकि ब्रा. – 27/4
71 ऋ. – 10/114/8
72 ऐतरेय ब्राह्मण – 6/15
73 ऐतरेय ब्राह्मण – 5/2
74 तै. ब्रा. – 218/8/4
वैदिक विज्ञान और भारतीय संस्कृति (पटना), 1972

*"चित्र देवानामुदगादनीकं चक्षुर्मित्रस्य वरूणस्याग्नेः।*

*आ प्रा धावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्थुषश्च।।"*[75]

मूलचक्रस्था खलु वाक्। सा किंचिदुपरि प्रेरिता भवति। तदनन्तरं सा मित्रवरूणाग्निनां चक्षुरभवत्। ततस्ततः वाचा दिवान्तरिक्षपृथिव्यः व्याप्ता। द्युस्थानीयेन मित्रेण पश्यन्त्याः, अन्तरिक्षस्थेन वरूणेन मध्यमा पृथिवीस्थानिना अग्निना वैखर्याः सङ्केतो भवति।

एवमेव चत्वारिवाक् परिमितापदानि इत्यत्रापि वाक् चतुर्धा विभक्ता। यथा –

*"चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः,*

*गुहा त्रीणि निहिता नेङगयन्ति तुरीयं वाचो मनुष्याः वदन्ति।।"*[76]

वैयाकरणाः अत्र 'नामाख्यातो पर्सनिपाताः 'इति पदान्' स्वीकुर्वन्ति। परंच नागेशभट्टः परापश्यन्तीमध्यमाप्रभृतीन् वाग्भेदान् स्वीकरोति। नागाख्यादीनां कृतेऽपि स्वीकृतिः प्रदीयते। वैदिकैः एते ओङ्कार – भू–भुवादय आहुतित्रयं मन्यन्ते। अन्यदपि "यद् वाग् वदन्त्यविचेतनानि..."' इत्यत्रापि वाचः चत्वारः भेदाः प्रतीयन्ते। अथर्ववेदेऽपि वाचः भेदद्वयं चतस्त्रः वा स्वीक्रियन्ते।

*"शिवास्त एका अशिवास्त एकाः सर्वा विभर्षि सुमनस्मानाः*

*तिस्त्रो वाचो निहिता अन्तरस्मिन्, तासामेकाविपतातानुघोषम्।"*[77]

शिवाशिवा च द्विधा। अनया दृष्ट्या तिस्त्रः वाचः अन्तर्निहिताः गूढाश्च सन्ति परंच एका घोषेन पतति परापश्यन्तीमध्यमैतेषां तिसृणां अभिव्यक्तिः न भवति परंच वैखर्याः वाचः "घोषेन पततिं' इत्यनेनावबुध्यते' यत् एतस्याः अभिव्यक्तिः भवति। दैनिकव्यवहाराः तयैव सम्पाद्यन्ते अन्यदपि – "दैवीं वाचमुद्यासं शिवामजस्त्रां[78] जुष्टां देवेभ्यः अत्रापि वागजस्त्रा श्रेयस्करी नित्या च वर्तते। आर्याणां विषये कथ्यते यत् दैवीं मानुषीं च वागद्वयं प्रयुंजन्ति स्म। सप्तवाणीति नाम्नापि वागुक्ता।

*"सत्यं तदिन्द्रावरूणा कृशस्य वां मध्य उर्मि दुहते सप्तवाणिः।*

*वार्भिदाश्रवां समवतं शुभस्पती यो वाम दब्धो अभि*

*पातिचितिभा कृषर्पेः सोमवत् वाक् तव हेतोः दुह्यति।"*[79]

---

75 ऋ. – 1/115/1

76 ऋग्वेद – 1/164/45
यद् वाग् वदन्त्य विचेतनानि, राष्ट्री देवानां निषसाद मन्द्रा।
चतस्त्र ऊर्जं दुदुहे पयांसि, क्वस्विदस्याः परमं जगाम। ऋ. – 8/100/10

77 अथर्ववेद – 7/43/9

78 ऋ. – 8/75/6

79 ऋ. 1/64/24

त्वं शुभकार्यकर्तृणां रक्षकोऽसि। यः स्वकर्मणा आनन्दयति तं पातु। सप्तवाणी गायत्रेणाक्षरेण मिमीते। गायत्री छन्दसा अर्कम् (ऋक्) ऋचाभिः साम, त्रिष्टुप्छन्दसा वेदविद्यानां प्राशस्त्यं, यजुना द्विचतुष्टपदा नाशरहिता, अथर्ववेदेन गायत्र्यादयः सप्तछन्दयुक्तावाणी मिमीते। यथोक्तं मन्त्रे –

*"गायत्रेण प्रति मिमीते अर्कमर्केण साम त्रैष्टुभेन वाकम्*

*वाकेन वाकं द्विपदा चतुष्पादाक्षरेण मिमते सप्तवाणीः।।"*[80]

**अन्यदपि –**

*"अक्षरेण मिमीते सप्तवाणी।" (ऋ. 1/64/24)*

छन्दपरिमिता वाक् जगदाधाररूपेण वर्त्तते। यथोक्तं – "वाचं देवा उपजीवन्ति विश्वे, वाचं गन्धर्वः पशवो मनुष्याः, वाचीमा विश्वा भुवनान्यर्पिता सा नो हवं जुषतामिन्द्रपत्नी।।

सा वाक् मन्दमध्यतारश्चैतासां रूपे त्रिधा विभज्यते। एतासां सम्बन्धः गायत्रीत्रिष्टुब्जगतीभि साकं वर्तते। प्रातकाले गायत्र्या', सावित्र्याः मध्याहनकाले, सांयकाले सरस्वत्याः उपासना क्रियते।

*"गायत्र्या ब्राह्मणं निरवर्तयत् त्रिष्टुभा राजन्यं जगत्या वैश्यम्।"*

ऋग्वैदिकमन्त्रस्यास्य व्याख्यां शतपथ ब्राह्मणे निरूक्तानिरूक्ता च वागद्वयमुक्तम्। निरूक्ता मनुष्यैः अनिरूक्ता पशुपक्षिभिरूच्यार्यते। वागेव विविधरूपेषु सर्वत्र व्याप्ता वर्तते। "सर्वा वा एतस्य वाचोऽवरूद्धाः। यो वाजपेययाजी। या पृथिव्यां याऽग्नौ सा रथंतरे। याऽन्तरिक्षे या वायो या वागदेव्ये। या दिवि याऽऽदित्ये सा वृहति। याऽप्सु यौषधीषु या वनस्पतिषु इति तस्मद्वाजपेययाज्यार्त्विजीनः सर्वाह्मस्य वाचोऽवरूद्धा इति।"

**आसुरी वाक् –** दर्पोन्मादपूर्णा या वाक् सा राक्षसी वागिंति नाम्नाभिधीयते। तर्हि कथमिति विवक्षायाम् ऐतरेयब्राह्मणे कथितं यत् –

*"यां वै दृप्तो यामुन्मत्तः सा वै राक्षसी वाक्।"*

*दर्पोन्मादान्वितैर्या वाग् भाष्यते सा तु राक्षसी।"*

*अनन्यमनसा यद्युच्यते चेत् आसुरीति वाक्।*

"यां ह्यन्यमना वाचं वदत्यसूर्या वौ सा वागदैव जुष्टा तद् यन्मैत्रावरूण उपप्रैसं प्रतिपद्यते मनसैव तद् वाचमीरयति इयमेव वाक् देवेभ्यः हव्यं सम्पादयंति। परमाकाशे शब्दरूपे व्याप्ता वागतिसूक्ष्मा सैव एकद्वित्रिपदैरयुक्ता भूत्वा अस्मभ्यं प्राप्यते।[81]"

वैदिकवाङ्मये दैवी–भौतिक–पार्थिव नामानि त्रेधा वाक् अभिहिता।

**दैवी वाक् –** योगिनः ये क्रान्तद्रष्टारः समाधिस्थजनाः तैरेव वाग्ज्ञातुं शक्यते। अनाहतवाद इत्यस्यापरनामधेयः। तस्याः भेदत्रयम् – "परापश्यन्तीमध्यमा चेति। यतोहि तिस्त्रः अनभिव्यक्तरूपाः भवन्ति। मूलस्थानाद् यदा गुदास्थानीयवर्णः स्वस्थानादुत्थाय हृदयपर्यन्तं गच्छति सा पश्यन्ती। पश्चन्त्यानन्तरं वाक् बुद्धिसंकल्पा भवति

80 तैत्ति. ब्रा. – 2/8/8/4

81 तै. ब्रा. 2/8/8/4,

तदा मध्यमा; मध्यमापि यदा बुद्धिसंयुक्ता भूता यदा मुखा न्निस्सरति सैव वैखरी वागिति। अग्निरेव तस्य मूलरूपं यतो हि सा एव वाचि परिणमति।

*"अग्नितत्वं हि वाग्वेदे मुख्यतत्वं प्रकीर्तितम्*

*लोके चाग्निर्हि वाग्भूत्वा सर्वेषां मुखमाविशत्।।"*[82]

वाचः तत्त्वत्रयम् अनभिव्यक्तं भवति केवलमेकमेव व्यक्तं भवति।

*"पदानि त्रीणि सन्त्यस्या वै गुहानिहितानि च।*

*तेष्वन्तिमं पदं व्यक्तं वैखरी या विश्रुता"*[83]

**अन्यदपि** –

*''पश्यन्ती पाठने प्रोक्ता परावाग्धि विचारणे*

*वैखरी व्यक्तरूपे हि ध्वनिरूपे च मध्यमा।*[84]

**भौतिकवाक्** – मेघाघोषः भूकम्पतीव्रता, विद्युतगर्जनम्, वृक्षाणां ध्वनिः इत्येवमादयः भौतिकवाचि आयान्ति।

**पार्थिववाक्** – जीवजन्तूनां मुखात् यः ध्वनिः श्रूयते सा पार्थिवनाम्नाभिव्यज्यते। निरूक्तानिरूक्ता च द्विविधा विवक्ता। व्याकरणनियमैः या व्युत्पाद्यते विविक्तुं शक्यते सा व्युत्पन्ना निरूक्ता च कथ्यते। अव्युत्पन्नवाचि अर्थो न संभवति परंच संयोगेन कोऽपि सार्थकशब्दः निर्मातुं शक्यते। यथा – टका, डंक, झोला, छाज प्रभृतयः।

वाक् स्थानमवरूणाद्धि। तस्यां विकारो भवति यतोहि सा प्राणान् गृहीत्वा त्यजति। प्रक्रियेयं सूक्ष्मतया प्रचलति। मूर्ता खलु वाक्। यावत्कालं वाक् स्वस्थानं न त्यजति तावत्कालपर्यन्त्ं परा वाग नायाति। परिवर्तनादेव तृणादीनि दुग्धे विपरिणमन्ति। वाक्यापदीयेऽप्युक्तम –

*दैवी वाग्व्यतिकीर्णेयमशक्तैरभिधातृभिः।*

*अनित्यदर्शिनां त्वमस्मिन् वादे बुद्धिविपर्ययः।। (वाक्य. – 145)*[85]

वैयाकरणैरूच्यते यत् दैवीवाणी अशक्तैरपभ्रंशयुक्ता सम्पादिता वेदेषु या वागुक्ता सा अतीव सूक्ष्मा सृष्टेः कारणरूपा वर्तते। वागित्यस्य रूपं मूर्तं कथयिंतु न शक्यते यतो हि तथैत सर्वाणि कार्याणि सम्पाद्यते। वैयाकरणानां यः शब्दब्रह्मणः सिद्धान्तः तस्य बीजरूपं वेदेष्वेवोपलभ्यते यथा ब्रह्मणः शक्तिः निरूक्तमनिरूक्तम्, अव्यक्तान् व्याकरोति तथैव वागपि प्रजापतेः, ब्रह्मणः च शक्तिस्वरूपा वक्तुं शक्यते। ''वाग्वै विराट् ''वाग्वै प्रजापतिः''[86], ''वाग् वै ब्रह्म'' इत्येतानि उदाहरणानि प्राप्यन्ते। वाक् सकलेऽपि वातावरणे वायोराकाशगैसादिषु

---

82 वाग्विज्ञान – पृ.92

83 वेदविज्ञानामृतम – 153

84 वाग्विज्ञानम्

85 वाक्यपदीयम्, पृ.सू.145

86 वाग्विज्ञानम्, पृ.सू.91

वर्तते। ऋषिभिः अग्निवायुरङ्गिादिभिः वाग्छ्रुता (वाग् अवगमिता तदनन्तरं वेदरूपे सा सम्पूर्णविश्वस्मै सुरक्षिता। सम्पूर्णभाषाविज्ञानस्य मूलरूपे वागेव। सा स्थूलेति तत्र मन्यते परंच तत्तु भाषादृष्ट्या अंगीक्रियते। वाचं बिना न संभवति जीवनमिति स्पष्टतया कथयितुं शक्यते। यथा परम्परायां अद्वैतस्य कल्पना विधीयते। भारतीयवाङ्गमये 'एकं सद्विप्रा बहुधां वदन्ति' इत्यत्र वैमत्यं न दरीदृश्यते। तथैव अत्रापि वाचा एव जगतः अभिव्यंज्यते। अतः वाक् आत्मतत्त्वमित्यापि स्वीकर्तुं शक्यते। उपनिषत्सु कथ्यते यत् – ''मृतिकेत्येव सत्यं नाम तु विकल्पमात्रम्।''[87]

एवमेव वाग्विवेचने ऋषिभिरपि वाक् ब्रह्मरूपेऽभिहिता। ''वाग् वै ब्रह्म'' इति।।

**संदर्भ ग्रंथ सूची**

1. निघण्टु निर्वचनम्, सुद्युम्नाचार्य, रामलाल कपूर ट्रस्ट, हरियाणा, 2055, वि.संवत्
2. ताण्ड्य ब्राह्मण, प्रो. पुष्पेन्द्र कुमार, नाग प्रकाशक, दिल्ली, (1998)
3. ऐतरेय ब्राह्मणम्, सुखप्रदाख्यवृतिसहितम्, नाग प्रकाशक, दिल्ली (1991)
4. यजुर्वेद–भाष्यम् (विवरण सहित), महर्षि दयानन्द सरस्वती, रामलालकपूर ट्रस्ट, हरियाणा।
5. कृष्णयजुर्वेदीय तैत्तिरीय संहिता, श्रीपाद दामोदर, रामलाल कपूर ट्रस्ट हरियाणा।
6. ऋग्वेद – महर्षि दयानन्द सरस्वती, दयानन्द संस्थान, नई दिल्ली।
7. यजुर्वेद – महर्षि दयानन्द सरस्वती, दयानन्द संस्थान, नई दिल्ली।
8. अथर्ववेद संहिता – श्री राम शर्मा आचार्य, युग निर्माण योजना, मथुरा (उ. प्रदेश), प्र.सं. 2008।
9. वाग्विज्ञान, आचार्य पण्डित श्री सीताराम चतुर्वेदी, चौखम्भा विद्याभवन, वाराणसी, (1969)
10. काव्य सर्जना और काव्यास्वाद, डॉ. वेंकट शर्मा, आत्माराम एण्ड संस, दिल्ली (1973)
11. पण्डित भगवद्दत, वैदिक वाङ्मय का इतिहास, प्रणव प्रकाशन, पंजाबी बाग, नई दिल्ली (प्र.सं. 1976)।
12. ऋक् सूक्त संग्रहः हरिदत्त शास्त्री, साहित्य भण्डार, मेरठ।
13. भाषा विज्ञान की भारतीय परम्परा और पाणिनी, रामदेव त्रिपाठी।
14. वैदिक वाङ्मय में विज्ञान, डॉ. रामेश्वर दयाल गुप्त, प्रकाशन – महर्षि दयानन्द राष्ट्रीय वेद विद्या प्रतिष्ठान, उज्जैन (1997)
15. वैदिक निबन्ध–माला, डा. धर्मेन्द्र शास्त्री, विद्यानिधि प्रकाशन, दिल्ली (2004)
16. शब्द ब्रह्म मीमांसा, कामदेव झा, आईबीए पब्लिकेशन्स, अम्बाला कैंट।
17. वेद–विज्ञान–वीथिका, डॉ. दयानन्द भार्गव, राजस्थानी ग्रन्थगार, जोधपुर (1998)

[87] तै. उपनिषद् – ब्रह्मानन्दवली